श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये सप्तसप्ततितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये सप्तसप्ततितमं दशकम् ॥

उपश्लोकोत्पत्तिवर्णनं, जरासन्धादियुद्धवर्णनं, मुचुकुन्दानुग्रहवर्णनं च

सैरन्ध्र्यास्तदनु चिरं स्मरातुराया
    यातोऽभूः सुललितमुद्धवेन सार्धम्।
आवासं त्वदुपगमोत्सवं सदैव
    ध्यायन्त्याः प्रतिदिनवाससज्जिकायाः ॥ 77.1 ॥

उपगते त्वयि पूर्णमनोरथां
    प्रमदसम्भ्रमकम्प्रपयोधराम्।
विविधमाननमादधतीं मुदा
    रहसि तां रमयाञ्चकृषे सुखम् ॥ 77.2 ॥

पृष्टा वरं पुनरसाववृणोद्वराकी
    भूयस्त्वया सुरतमेव निशान्तरेषु।
सायुज्यमस्त्विति वदेत् बुध एव कामं
    सामीप्यमस्त्वनिशमित्यपि नाब्रवीत् किम् ॥ 77.3 ॥

ततो भवान् देव निशासु कासुचि -
    न्मृगीदृशं तां निभृतं विनोदयन्।
अदादुपश्लोक इति श्रुतं सुतं
    स नारदात् सात्त्वततन्त्रविद् बभौ ॥ 77.4 ॥

अक्रूरमन्दिरमितोऽथ बलोद्धवाभ्या -
    मभ्यर्चितो बहु नुतो मुदितेन तेन।

एनं विसृज्य विपिनागतपाण्डवेय -
    वृत्तं विवेदिथ तथा धृतराष्ट्रचेष्टाम् ॥ 77.5 ॥

विघाताज्जामातुः परमसुहृदो भोजनृपते -
    र्जरासन्धे रुन्धत्यनवधिरुषान्धेऽथ मथुराम् ।
रथाद्यैर्द्योर्लब्धैः कतिपयबलस्त्वं बलयुत -
    स्त्रयोविंशत्यक्षौहिणि तदुपनीतं समहृथाः ॥ 77.6 ॥

बद्धं बलादथ बलेन बलोत्तरं त्वं
    भूयो बलोद्यमरसेन मुमोचिथैनम् ।
निश्शेषदिग्जयसमाहृतविश्वसैन्यात्
    कोऽन्यस्ततो हि बलपौरुषवांस्तदानीम् ॥ 77.7 ॥

भग्नः स लग्नहृदयोऽपि नृपैः प्रणुन्नो
    युद्धं त्वया व्यधित षोडशकृत्व एवम् ।
अक्षौहिणीः शिव शिवास्य जघन्थ विष्णो
    सम्भूय सैकनवतित्रिशतं तदानीम् ॥ 77.8 ॥

अष्टादशेऽस्य समरे समुपेयुषि त्वं
    दृष्ट्वा पुरोऽथ यवनं यवनत्रिकोट्या ।
त्वष्ट्रा विधाप्य पुरमाशु पयोधिमध्ये
    तत्राऽथ योगबलतः स्वजनाननैषीः ॥ 77.9 ॥

पद्भ्यां त्वं पद्ममाली चकित इव पुरान्निर्गतो धावमानो
    म्लेच्छेशेनानुयातो वधसुकृतविहीनेन शैले न्यलैषीः ।
सुप्तेनाङ्घ्र्याहतेन द्रुतमथ मुचुकुन्देन भस्मीकृतेऽस्मिन्
    भूपायास्मै गुहान्ते सुललितवपुषा तस्थिषे भक्तिभाजे ॥ 77.10 ॥

ऐक्ष्वाकोऽहं विरक्तोऽस्म्यखिलनृपसुखे त्वत्प्रसादैककाङ्क्षी
    हा देवेति स्तुवन्तं वरविततिषु तं निस्पृहं वीक्ष्य हृष्यन् ।

मुक्तेस्तुल्यां च भक्तिं धुतसकलमलं मोक्षमप्याशु दत्वा
कार्यं हिंसाविशुध्यै तप इति च तदा प्रात्थ लोकप्रतीत्यै ॥ **77.11** ॥

तदनु मथुरां गत्वा हत्वा चमूं यवनाहृतां
मगधपतिना मार्गे सैन्यैः पुरेव निवारितः।
चरमविजयं दर्पायास्मै प्रदाय पलायितो
जलधिनगरीं यातो वातालयेश्वर पाहि माम् ॥ **77.12** ॥

॥ इति श्रीमन्नारायणीये सप्तसप्ततितमं दशकं समाप्तम् ॥